केशवेति च कीर्त्तयेत् । गोमूत्रप्राशनात् पूतः स्वर्गलोके महीयते । आराधितस्य जगतामीश्वरस्य महात्मनः । उत्क्रान्तिकाले स्मरणं केशवस्य तथाप्नुयात् । चौरस्य प्राशनं श्रेष्ठं विधिनेदं यथोदितम् । कार्त्तिकादि यथान्यायं कुर्य्यान्मासचतुष्टयम् । तेनैव विधिना ब्रह्मन् ! तत्र विष्णुं प्रकीर्त्तयेत् । स याति विष्णुसालोक्यं विष्णुं स्मरति तत्क्षये । प्रतिमासं द्विजातिभ्यो दद्याद्दानं यथेच्छया । सुगतिद्वादशीमेतां श्रद्दधानश्च यो नरः । उपोष्येति तथा नारी प्राप्नोति विविधां गतिम्” ।

सुजन्मद्वादशीव्रतं विष्णुधर्म्मोत्तरे “पौषे मासि सिते पक्षे द्वादश्यां शक्रदैवते । नक्षत्रयोगगे विष्णुं प्रथमं तु समर्च्चयेत् । ततः प्रभृति विप्रेन्द्र ! मासि मासि जनार्द्दनम् । उपोषितः पूजयेत यावत् संवत्सरं गतम् । मासे च मासे विधिनोदितेन तस्यां तिथौ दानमिति ब्रवीमि । प्राश्यं यथावद्विधिवत् क्रमेण तदुच्यमानं निखिलं निबोध । घृतं तथा व्रीहियवं हिरण्यं यवान्नमम्भस्तथकान्नपानम् । छत्रं पयोऽन्नं गुड़फाणिताढ्यं सुचन्दनं वस्त्रमनुक्रमेण । एकैकमासोक्तमथैकदानं गोमूत्रमम्भो घृतमामशाकम् । दूर्व्वादधिव्रीहियवं तिलांश्च सूर्य्यांशुतप्तं जलमम्बु दार्भम्” ।

सुजन्मावाप्तिव्रत विष्णुधर्म्मोत्तरे “मेषसंक्रमणे भानोः सोपवासो नरोत्तम ! । पूजयेद्भार्गवं देवं रामं शक्त्या यथाविधि । वृषसंक्रमणे प्राप्ते तथा कृष्णञ्च पूजयेत् । तथा मिथुनसंक्रान्तौ पूजयेद्भोगशायिनम् । तथा कुलीरसंक्रान्तौ वराहमपराजितम् । नरसिंहं तथा देवं सिंहसंक्रमणे विभुम् । कन्यासंक्रमणे देवं तथाश्वशिरसं यजेत् । तुलासंक्रमणे कूर्म्मं पूजयेत् भक्तिभावतः । अलिसंक्रमणे कल्किं देवं संपूजयेत् नरः । धनुःसंक्रमणे बुद्धं देवमभ्यर्च्चयेत् बुधः । तथा मकरसंक्रान्तौ रामं दशरथात्मजम् । कुम्भसंक्रमणे राजन् ! रामं यादवनन्दनम् । मीनसंक्रमणे मत्स्यं वासुदेवन्तु पूजयेत् । पटे वा यदि वार्च्चायां गन्धमाल्यान्नसम्पदा । प्रादुर्भावस्य नाम्ना च च होमं कुर्व्वीत पार्थिव ! । व्रतान्ते जलधेनुन्तु छत्रोपानत्समन्विताम् । वस्त्रयुग्मयुतां दद्यात् प्रतिमासं सकाञ्चनाम् । रात्रौ तु दीपमालाभिर्द्देवदेवं प्रपूजयेत् । कृत्वा व्रतं वत्सरमेतदिष्टं म्लेच्छेषु तिर्य्यक्षु न चापि जन्म । प्राप्नोत्यवाप्नोति चिरञ्च नाकं कामांस्तथाप्नोति मनोऽभिरामम्” ।

सुदर्शनषष्ठीव्रतं गरुड़पु० “अथ षष्ठ्यान्तु राजन्यः समुपोष्य यथाविधि । चक्राब्जमण्डलं कृत्वा कर्णिकायां सुदर्शनम् । दलेषु लोकपालानामायुधानि समर्च्चयेत्” । चक्राब्जं चक्रनाभिघटिताब्जम् । “स्वान्यायुधानि पुरतः प्रतिष्ठाप्य प्रपूजकः । रक्तचन्दनसिद्धार्थरक्तपुष्पाङ्कुरैरपि । रक्तवस्त्रैः सुगन्धाढ्यैर्भूषणादिभिरर्च्चयेत्” इत्यादि ।

सुनामद्वादशीव्रतं वह्निपु० “शृणुष्वैकमना भूप ! सुनामद्वादशी शुभा । सर्व्वपापहरा स्वर्ग्या भुक्तिमुक्तिप्रदायिका । मनसा च चिकीर्षन्ति द्वादशीं ये नरोत्तमाः । तेऽपि घोरं न पश्यन्ति पुनः संसारसागरम् । आद्यं सर्व्वव्रतानां तु वैष्णवानां नृपोत्तम ! । नरैः स्त्रीभिश्च कर्त्तव्यं विष्णोस्तुष्टिकरं परम् । मार्गशीर्षे शुभे मासि शुक्लपक्षे यतव्रतः । प्रथमञ्चैव गृह्णीयात् द्वादशीं विधिवन्नरः । मनोवाक्कायचेष्टाभिः सुविशुद्धो जितेन्द्रियः । दशम्यां नियतः स्नात्वा प्रणिपत्य जनार्द्दनम् । हविष्यान्नकृताहारः शुचिर्भूत्वा भवेद्व्रती । उपलिप्ते शुचौ देशे भक्षयेद्दन्तधावनम् । उपोष्यैकादशीं सम्यक् पूजयित्वा जनार्द्दनम् । सुनामद्वादशीं देव ! अहं भोक्ष्ये परेऽहनि । एवं सङ्कल्प्य नियमं प्रणम्य गरुड़ध्वजम् । दशम्यामेकभक्ताशी संयतः संवसेन्निशाम् । एकादश्यां ततः प्रातरेकचित्तः समाहितः । पूर्व्वं संपूजयेत् सूर्य्यं ततो देवं प्रपूजयेत्” वर्षसाध्यमिदम् ।

सुरूपद्वादशीव्रतम् उमामहेश्वरसंवादे “पौषमासं तु संप्राप्य पुष्यर्क्षे तु सुशोभयेत् । तस्यां रात्रौ संयतात्मा ध्यात्वा विष्णुं सनातनम् । श्वेता गैरिकवर्णा च तस्या ग्राह्या गोमयम् । अन्तरिक्षात् प्रपतितं शुचिर्भौमवास्थितः । तस्याः कृत्वाऽऽहुतीनाञ्च शतमष्टोत्तरं तिलैः । प्रतीच्यैकादशीं कृष्णामुपवासपरायणैः । भाव्यं नियमसंयुक्तैर्विशेषात् संयतात्मभिः । स्नात्वा नद्यां तड़ागे वा विष्णुमेवाथ चिन्तयेत् । सौवर्णकं हरिं कृत्वा रौप्यं वासः स्वशक्तितः । तिलपात्रोपरिस्थे च न्यसेत् कुम्भे सद्रव्यके” इत्यादि । “एवं यः कुरुते देवि ! सुरूपद्वादशीव्रतम् । नरो वा यदि वा नारी तस्य पुण्यं शृणुष्व मे । दौर्भाग्यं नश्यते तस्य अपि जन्मान्तरार्जितम् । अपि भुव्यस्य सम्पर्कौ जायते कारणान्तरात् । तस्यापि न भवेद्दुःखं वैरूप्यं तस्य जन्मनि” ।

सूर्य्यव्रतं विष्णुधर्म्मोत्तरे “शिरसोवपनं कृत्वा योऽर्च्चयेत